नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 26

No. of Printed Pages – 7

# UP-71-संस्कृतम् (T.L.)

## प्रारम्भिक शिक्षा पूर्णता प्रमाण-पत्र परीक्षा – 2016

## कक्षा – 8

## तृतीय भाषा – संस्कृतम्

समय : 2.30 होरा ] [ पूर्णाङ्काः : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) प्र. 1 से 8 तक बहुविकल्पीय प्रश्नों के उत्तर, तालिका बनाकर एक साथ लिखे ।

1. नराधिपस्य पदस्य सन्धि विच्छेदः भवति 1

(अ) नराधि + पस्य (ब) नर + अधिपस्य

(स) नराः + अधिपस्य (द) नर + धिपस्य

2. "अत्रैव निगूढो भूत्वा तिष्ठामि" रेखांकित पदे प्रत्ययः अस्ति 1

(अ) ल्यप् (ब) तुमुन्

(स) क्त्वा (द) अनीयर्

3. भगवदज्जुकम् पाठस्य क्रमः अस्ति 1

(अ) तृतीयः (ब) पञ्चमः

(स) अष्टमः (द) द्वादशः

4. "उपवनस्य द्वारे एव प्लास्टिकस्यूतकानि क्षिप्तानि" अत्र अव्ययपदमस्ति 1

(अ) उपवनस्य (ब) द्वारे

(स) एव (द) क्षिप्तानि

5. तथैव पृथ्वीसूर्ययोः मध्ये <u>समागतस्य</u> चन्द्रस्य छायावातेन सूर्यग्रहणं दृश्यते । रेखांकित पदे उपसर्गः अस्ति 1

(अ) सम् (ब) आगत

(स) समा (द) समागत

6. "सप्त भगिन्यः" पदे समासः अस्ति 1

(अ) तत्पुरुषः (ब) अव्ययीभावः

(स) द्विगुः (द) कर्मधारयः

7. लृट्लकारस्य पदमस्ति 1

(अ) करोमि (ब) अकुरुतः

(स) कुर्मः (द) करिष्यामि

8. "अस्मद्" शब्दस्य चतुर्थीविभक्तेः एकवचनम् अस्ति 1

(अ) मया (ब) मत्

(स) मह्यम् (द) अहम्

9. सन्धिविच्छेदं कुरुत – 2

सदैव, मृगादीनाम्, इत्यस्मिन्, शैलेन्द्रम्

10. पदनिर्माणम् कुरुत – 2

परि + भ्रमन्, प्रति + आगत, वि + सृज् + ल्यप्, प्र + दीप्त

11. समासविग्रहम् कुरुत – 2

प्रतिवर्षम्:, पूर्वापरौ, त्रिनेत्र:, भयभीता:

12. अधोलिखितपदेषु प्रकृति-प्रत्यय विभागं कुरुत – 2

गन्तुम्, विसृज्य, स्नात्वा, जलमानीय

13. अधोलिखितानि पदानि निर्देशानुसारं परिवर्तयत – 2

(i) कृपण – षष्ठी एकवचनम्

(ii) शोभन – सप्तमी एकवचनम्

(iii) इदम् – न.पु. प्रथमा एकवचनम्

(iv) पशु – प्रथमा बहुवचनम्

14. मञ्जूषात: सर्वनामपदानि चित्वा रिक्तस्थानानि पूरयत – 2

| ते, मम, इमे, स: |
|---|

(i) एवं ________ बिले प्रविश्य मे भोज्यं भविष्यति ।

(ii) अहं ________ सिरावेद्यं करिष्यामि ।

(iii) तेन ________ श्रान्ति: अपगमिष्यति ।

(iv) ________ एव तडागा: अत्र संसारसागरा: इति ।

15. अधोलिखितवाक्येषु रेखांकितपदेषु प्रयुक्तां विभक्तिं लिखत : 2

(i) बहूनि वस्तूनि परितो विकीर्णानि ।

(ii) वृक्षाग्रवासी न च पक्षिराज: ।

(iii) अस्माकं फलानि खादन्ति ।

(iv) नमो भगवत्यै ।

16. मञ्जूषात: अंकानां कृते पदानि चिनुत – 2

| पञ्चसप्तति:, शतम्, पञ्चाशत्, चतुष्षष्टि: |
|---|

(i) 50 _________ (ii) 64 _________

(iii) 75 _________ (iv) 100 _________

17. प्रश्नानाम् उत्तराणि लिखत – 5

(i) कस्यां रोचमानायां सर्वं कुलं रोचते ?

(ii) "सदैव पुरतो निधेहि चरणम्" गीतस्य रचनाकार: क: ?

(iii) कुमारसम्भवमहाकाव्यस्य रचयिता क: ?

(iv) महास्फोट: कुत्र अस्ति ?

(v) केषाञ्चित् पञ्च पुष्पाणां नामानि लिखत ।

18. पूर्णवाक्येन उत्तरत – 5

(i) गणिकाया: नाम किम् ?

(ii) गजधर: क: ?

(iii) सावित्र्या: द्वयो: काव्यसङ्कलनयो: नाम्नी के ?

(iv) उपवनस्य द्वारे कानि क्षिप्तानि सन्ति ?

(v) प्रेमली कस्य पत्नी आसीत् ?

19. घटनाक्रमानुसार वाक्यानि लिखत – 5

(i) एतस्मिन् अन्तरे गुहाया: स्वामी दधिपुच्छ: नाम शृगाल: समागच्छत् ।

(ii) कस्मिंश्चित् वने खरनखर: नाम सिंह: प्रतिवसति स्म ।

(iii) स: बिले प्रविश्य मे भोज्यं भविष्यति ।

(iv) भो बिल ! भो बिल किं न स्मरसि ।

(v) नूनम् अस्मिन् बिले सिंह: अस्तीति तर्कयामि ।

20. समानार्थकानि पदानि मेलयत – 5

| | |
|---|---|
| गृहम् | कुम्भ: |
| सलिलम् | शिशुम् |
| द्रुतम् | जलम् |
| बालम् | शीघ्रम् |
| घट: | भवनम् |

21. पाठ्यपुस्तकात् द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न स्यात् । 5

22. रेखांकितपदानि आधृत्य प्रश्न-निर्माणं कुरुत – 5

(i) आसीत् महान् गणितज्ञ: ज्योतिर्विच्च आर्यभट्ट: ।

(ii) महाराष्ट्रस्य प्रथमा महिला शिक्षिका सावित्री बाई फुले आसीत् ।

(iii) अस्माकम् देशे सप्त केन्द्रशासितप्रदेशा: अपि सन्ति ।

(iv) चुल्ली सम्यक् न ज्वलति तावत् फूत्कुरु ।

(v) चञ्चलो नाम व्याध: आसीत् ।

23. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 7

"आर्यभट्टः फलितज्योतिषशास्त्रे न विश्वसिति स्म । गणितीयपद्धत्या कृतम् आकलनमाधृत्य एव तेन प्रतिपादितं यद् ग्रहणे राहु-केतुनामकौ दानवौ न स्तः कारणम् । तत्र तु सूर्यचन्द्रपृथिव्यः इति त्रीणि एव कारणानि । सूर्यं परितः भ्रमन्त्याः पृथिव्याः चन्द्रस्य परिक्रमापथेन संयोगाद् ग्रहणं भवति । यदा पृथिव्याः छायापातेन चन्द्रस्य प्रकाशः अवरुध्यते तदा चन्द्रग्रहणं भवति । तथैव पृथ्वीसूर्ययोः मध्ये समागतस्य चन्द्रस्य छायापातेन सूर्यग्रहणं दृश्यते ।"

(i) ग्रहणे तेन प्रतिपादितानि कति कारणानि सन्ति ?

(ii) दानवौ कौ आस्ताम् ?

(iii) ग्रहणस्य कारणम् किम् ?

(iv) तथैव पदस्य सन्धि विच्छेदं कुरुत ?

(v) सूर्यचन्द्रपृथिव्यः – पदस्य समास विग्रहम् कुरुत ।

(vi) "सूर्यं परितः भ्रमन्त्याः पृथिव्याः चन्द्रस्या । रेखांकितपदस्य विभक्ति लिखत ।

(vii) 'परितः' शब्दस्य अर्थः अस्ति ।

24. श्लोकस्य भावार्थं लिखत – (हिन्दी भाषा में) 7

पीत्वा रसं तु कटुकं मधुरं समानं
माधुर्यमेव जनयेन्मधुमक्षिकासौ ।
सन्तस्तथैव समसज्जनदुर्जनानां
श्रुत्वा वचः मधुरसूक्तरसं सृजन्ति ।।

**या**

वृक्षाग्रवासी न च पक्षिराजः
त्रिनेत्रधारी न च शूलपाणिः ।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्न घटो न मेघः ।।

25. "भगवदज्जुकम्" प्रहसनस्य **अथवा** "जलवाहिनी" लोकगीतस्य सारं हिन्दीभाषायाम् लिखत । 6

26. भवान् राजकीय उच्च प्राथमिक विद्यालय, मानगढे, अष्टमकक्षायाम् पठति । स्वकीय प्रधानाध्यापकस्य कृते शुल्कमुक्त्यर्थं प्रार्थनापत्रं संस्कृतभाषायां लेखनीयम् । 6

**वा**

भवती राजकीय उच्च प्राथमिक विद्यालय, घण्टालीमध्ये, अष्टमकक्षायाम् पठति । स्वकीयप्रधानाध्यापकस्य कृते स्थानान्तरण-प्रमाण-पत्रार्थं प्रार्थनापत्रं संस्कृतभाषायां लेखनीयम् ।